दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-134 | 1 | मार्च 06, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रकृष्णतृतीया
फाल्गुण 22 प्रविष्टांशः मङ्गलमयः भवेत्

2 भूटान-नरेशेन सह मुख्य-न्यायाधीशस्य सूर्यकान्तस्य सौहार्दपूर्ण-मेलनम्

3 हिमाचलप्रदेशात् अनुरागशर्मा राज्यसभायाः कृते कांग्रेस -पक्षस्य अभ्यर्थी भविष्यति, अद्य करिष्यति नामांकनम्

4 हिन्दुधर्मस्य आध्यात्मिकसंस्कृतिः हि भगवत्प्रेमसम्बद्धा संस्कृतिः वर्तते।

# ICC T20 WORLD CUP 2026-विंशति- विंशतिः विश्वचषकस्य उपांत्यचक्रे भारतेन इंग्लैंडदलं 7 धावनांकैः पराजितम्,अन्तिमचक्रे प्रवेशः








## इदानीं मार्च 08 दिनांके न्यूज़ीलैंडदेशेन सह भविष्यति स्पर्धा

हिमसंस्कृतवार्ताः- कामेश्वर शर्मा। गत दिवसे विंशति- विंशतिः क्रिकेट- विश्वचषके मुम्बई स्थिते वानखेडे इति क्रीडांगणे भारतेन इंग्लैण्डदलं 7 धावनांकैः पराजितम्। पणकं विजित्य इंग्लैण्डदलेन क्षेत्ररक्षणं चयनितम्। फलकक्रीड़ायां भारतस्य प्रारम्भः सुदृढः नाभवत्। प्रारम्भिकक्रीडकः अभिषेकशर्मा द्वितीये कन्दुचक्रे 09 धावनांकानामोपरि विल जैक्स इत्यनेन बाधितः। तदनन्तरं संजू सैमसन 42 कन्दुकेषु 89, ईशान किशन 39, सूर्यकुमारयादवः 6 कंदुकेषु 11, हार्दिक पांड्या 12 कन्दुकेषु 27, तिलकवर्मा 7 कन्दुकेषु 21, शिवम दुबे 25 कन्दुकेषु 43 धावनांकान् योजितवन्तः। एतेषां सहयोगेन भारतेन 20 कन्दुचक्रेषु 7 स्तोभहानौ 253 धावनांकाः अर्जिताः। इंग्लैंडपक्षतः विल जैक्सः, आदिल रशीदश्च 02-02 भारतीयक्रीडकान् बाधितवन्तौ। जोफ्रा आर्चर 01 स्तोभं प्राप्तवान्। 254 धावनांकानां प्राप्तिक्रमे इंग्लैण्ड देशस्य प्रारम्भः सुदृढः नाभवत्। फिल सॉल्ट द्वितीय कन्दुचक्रे हार्दिक पाण्डया इत्यनेन बाधितः। तदनु जोस बटलर 17 कन्दुकेषु 25, जैकब बैथल 48 कन्दुकेषु 105, विल जैक्स 20 कन्दुकेषु 35 इत्येतेषां सहयोगेन इंग्लैण्ड देशेन 20 कन्दुचक्रेषु 7 स्तौभहानौ 246 धावनांकाः अर्जिताः। इंग्लैंडपक्षतः जैकब बैथल तीव्रतमम् अर्धशतकं कृतवान्। तेन स्वकीयं शतकमपि कृतं परन्तु स्वकीयं दलं विजेतुं सः समर्थो नाभवत्। भारतीयकन्दुकक्षेपकेशु हार्दिक पांड्या 2, अर्शदीप सिंहः, अक्षर पटेलः, वरुण चक्रवर्ती, जसप्रीत बुमराहश्च 1-1 स्तोभं प्राप्तवन्तः। भारतीयक्षेत्ररक्षणमपि उत्कृष्टमासीत्।

भारतीयपक्षे स्वकीयोत्तम- प्रदर्शनाय संजू सैमसन स्पर्धापुरुषः चयनितः।

## सुभाषितम्

**उचितं व्ययशीलस्य,**
**कृशत्वमपि शोभते।**
**द्वितीयाचन्द्रमा वन्द्यो,**
**न वन्द्यः पूर्णचन्द्रमा।**

भावार्थः- मुक्त हस्त से दान करने वाले व्यक्तियों का क्षीण हो जाने पर भी समाज में उसी प्रकार सुशोभित (सम्मानित) होना वैसे ही उचित है जैसे कि शुक्लपक्ष में द्वितीया तिथि का चन्द्रमा वन्दनीय है न कि पूर्णमासी का चन्द्रमा।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## बिहारस्य मुख्यमन्त्री नितीशकुमारः राज्यसभा-निर्वाचनार्थं नामाङ्कनं कृतवान्

**हिमसंस्कृतवार्ताः** - बिहारस्य मुख्यमन्त्री अथ च जे.डी.यू अध्यक्षः नितीशकुमारः राज्यसभानिर्वाचनार्थ नामाङ्कनं कृतवान्। नामाङ्कनमिदं पटनायां बिहार-विधानसभायां सचिवस्य समक्षं कृतम् । केन्द्रीय-गृह-मन्त्री अमितशाहः, भाजपेतिदलस्य राष्ट्रिय अध्यक्षः नितिन नबीनः, बिहारस्य उपमुख्यमन्त्री सम्राट् चौधरी, विजय सिन्हा इत्यादयः वयोवृद्ध-नेतारः उपस्थिताः आसन्। श्री-कुमारः पूर्वमेव अघोषयत् यत् सः आगामि राज्यसभायाः निर्वाचने भागं ग्रहीष्यति, येन बिहारस्य प्रमुखः राजनीतिको विकासो भवेत्। सामाजिकान्तर्जालीय माध्यमे श्री-कुमारः अवदत् यत् बिहार-विधानमण्डलस्य उभयसदनानां अपि च संसदः उभयसदनानां सदस्यः भवितुम् तस्य अभिलाषा आसीत् । विहारस्य जनैः सह तस्य सम्बन्धः इत्थमेव भविष्यति, नूतनसर्वकारस्य पूर्णसमर्थनं मार्गनिर्देशं च करिष्यति इति सः आश्वासितवान् ।

## भारत-फिनलेण्ड-देशौ विभिन्नविषयेषु विभिन्नसन्धेः आदानप्रदानम् अकुरूताम्



**हिमसंस्कृतवार्ताः** - भारत-फिनलेण्ड-देशौ नवदेहल्यां पर्यावरण-सहकारः, प्रवास-सञ्चार-सहभागित्वम्, सांख्यिकी इत्यादिषु विभिन्नक्षेत्रेषु विभिन्नसन्धेः आदानप्रदानम् अकुरूताम् । प्रधानमन्त्री नरेन्द्रमोदी फिनलेण्ड-देशस्य राष्ट्रपतिना अलेक्ज़ाण्डर स्टब इत्यनेन सह विविधक्षेत्रेषु द्विपाक्षिकसहयोगं सुदृढं कर्तुं चर्चा विहितवान्। तौ वहुपाक्षिक-मञ्चेषु सहकार्यं समेत्य परस्पर-हितस्य क्षेत्रीय-वैश्विक-विषयेषु अपि विचाराणाम् आदानप्रदानम् अकुरूताम्। स्वस्य संयुक्त-वक्तव्ये प्रधानमन्त्रिणा मोदिना प्रोदीरितं यत् अद्य विश्वं अस्थिरतायाः अनिश्चिततायाः च क्षणे अस्ति। सः अवदत् यत्, युक्रेन्-देशात् पश्चिम-एशिया-पर्यन्तं, विश्वस्य अनेकेषु प्रदेशेषु अविरतं संघर्षाः प्रचलन्ति। प्रधानमन्त्री मोदी अब्रवीत् यत्, भारत-फिनलेण्ड-देशयोः सर्वसम्मतिः अस्ति यत् केवलं सैन्य-संघर्षेन कस्यापि समस्यायाः निराकरणं न कर्तुं शक्यते । श्रीमोदी वर्यः अवदत् यत्, षडविंशत्युत्तर-द्विसहस्र-तमवर्षस्य आरम्भे ऐतिहासिकः भारत-यूरोपीयसङ्घ-मुक्तव्यापारसमन्वयः हस्ताक्षरितं गतः । सः अवदत् यत्, इयं सन्धिः निष्चप्रचं भारत-फिनलेण्ड-देशयोः मध्ये व्यापारम्, निवेशं, प्रौद्योगिकीयसहयोगं च इतोऽपि सुदृढं करिष्यति । अवधेयं यत् फिनलेण्ड-देशस्य राष्ट्रपतिः भारतस्य चतुर्दिवसीय यात्रायै नवदेहलीं समागतवान् ।

**विदेशमन्त्री डा.एस्.जलशङ्करः फिनलैण्ड-देशस्य राष्ट्रपतिना सह मिलितवान्।**

विदेशमन्त्री डा.एस्. जलशङ्करः नवदेहल्यां फिनलैण्ड्-देशस्य राष्ट्रपतिं एलेक्ज़ैण्डर् स्टव् इत्येतं मिलितवान्। सामाजिकजनसंचारपटले डा. जयशङ्करः दृढविश्वासं प्रकटितवान् यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना सह फिनलैण्ड्-देशस्य राष्ट्रपतेः मेलनेन भारत- फिनलैण्ड्-देशयोः सम्बन्धः इतोऽपि सुदृढो भविष्यति

## नेपालदेशे निर्वाचनं शान्तिपूर्वकं सुसम्पन्नम्




**हिमसंस्कृतवार्ताः** - गतदिवसे नेपालदेशे मतदानम् आधिकारिकरूपेण सायं पञ्चवादने समाप्तम्। प्रातः सप्तवादनात् शांतिपूर्णरीत्या मतदानं सम्पन्नम्। प्राप्तवार्तानुसारं प्रातः एकादशवादनं यावदेव ऊनविंशतिलक्ष मतदानं अजायत। सुदृढ़ा सुरक्षा व्यवस्था मतदानावधौ आसीत्।

# रायसीना-संवादः-: भारतस्य वैश्विकभूमिका च




हिमसंस्कृतवार्ता। नूतनदेहल्यां प्रधानमंत्री नरेन्द्रमोदी गतदिने रायसीना-संवादस्य एकादशतमं संस्करणम् आरब्धवान्। मुख्यभाषणे फिनलैंड-देशस्य राष्ट्रपतिना आलेक्सांदर-स्तूब महोदयेन उक्तं यत् विकासशीलाः अल्पविकसिताः च देशाः एव भविष्यस्य विश्वव्यवस्थां निश्चितं करिष्यन्ति, अस्मिन् च भारतस्य भूमिका महत्त्वपूर्णा भविष्यति।तेन प्रतिपादितं यत् वैश्विक-शक्ति-सन्तुलनं परिवर्तितम् अस्ति। विकसनशीलानाम् अल्पविकसितानां च देशानां पार्श्वे अर्थव्यवस्था जनसङ्ख्या च इति द्वौ अपि पक्षौ सुदृढौ स्तः। राष्ट्रपतिना उक्तं यत् "पाश्चात्य-प्रभुत्वस्य युगः समाप्तः", किन्तु पाश्चात्यदेशाः एतद् अवगन्तुं किञ्चित् समयं नेष्यन्ति। सः अङ्गीकृतवान् यत् अद्यतन-विश्वराजनीतौ बहवः प्रबलाः आह्वानाः सन्ति।तेन उक्तं यत् यदि राष्ट्राणि अन्तर्राष्ट्रिय-नियमानां पालनं त्यजन्ति, तर्हि वर्तमान-विश्वव्यवस्था विनष्टा भविष्यति। पाश्चात्यदेशैः एषः प्रयासः करणीयः यत् एकस्मिन् अपूर्ण-विश्वे शक्तेः नियन्त्रणस्य सर्वोत्तमः मार्गः कः अस्ति।राष्ट्रपतिना स्तूब महोदयेन प्रशंसितं यत् भारतं कदापि भ्रमे न अतिष्ठत्, अपितु स्वकीयां विदेशनीतिं व्यावहारिक-विश्वदृष्टिकोणेन आधृतवान्। भारतं स्वं पृथक् न करोति, अस्य शक्तिः च सक्रिय-सहभागितायाम् अस्ति।नूतन-विश्वव्यवस्थायाः निर्माणविषये डॉ. स्तूब महोदयेन उक्तं यत् फिनलैंड-देशस्य नीतिः 'मूल्याधारित-यथार्थवादे' स्थिता अस्ति। भारतं तु सहस्रवर्षेभ्यः अस्याः नीतेः पालनं करोति। संयुक्तराष्ट्रसङ्घस्य एकस्य रचनात्मक-सदस्यस्य रूपेण भारतस्य कार्यशैलीतः एतत् स्पष्टं भवति।तेन बलपूर्वकं उक्तं यत् संयुक्तराष्ट्र-सुरक्षापरिषदि भारतं स्थायी-स्थानं प्राप्तुं योग्यम् अस्ति। व्यापारस्य उपयोगः सम्प्रति भू-राजनैतिक-अस्त्ररूपेण क्रियते, अतः अस्मिन् युगे भारतस्य नेतृत्वस्य आवश्यकता वर्तते। सः अवदत् यत् नूतन-तन्त्रज्ञानेन विकसित-विकसनशीलदेशानां मध्ये भेदः न वर्धनीयः।अस्मिन् अवसरे विदेशमन्त्री डॉ. एस. जयशंकरः अवदत् यत् भारतीयाः वैश्विक-जागरूकतां अधिकं विकसयेयुः। आगामि-दिनेषु आयोजिताः चर्चाः नूतन-क्षमतासु, प्रौद्योगिक्याम्, कत्रिम-प्रज्ञायाम् (AI), नूतन-चिन्तने च केन्द्रिताः भविष्यन्ति।

## भूटान-नरेशेन सह मुख्य-न्यायाधीशस्य सूर्यकान्तस्य सौहार्दपूर्ण-मेलनम्



**थिम्फू (भूटानम्):** भारतस्य मुख्य-न्यायाधीशः न्यायमूर्ति-सूर्यकान्तः थिम्फू-नगरे भूटानस्य नरेशेन जिग्मे खेसर नामगेल वांगचुक महोदयेन सह शिष्टाचार-भेटं कृतवान्। अस्मिन् मेलने सः भूटान-देशे न्यायिक-प्रक्रियाणां तन्त्रज्ञान-सहयोगाय (Technical Cooperation) तथा च अङ्कीकरणाय (Digitization) व्यापक-समर्थनस्य प्रस्तावं प्रस्तुतवान्।सर्वोच्चन्यायालयेन सूचितं यत् मुख्य-न्यायाधीशः उभयदेशयोः द्विपक्षीय-सम्बन्धान् अधिकं सुदृढं कर्तुं विचाराणां आदान-प्रदानम् अपि अकरोत्। ताभ्यां वर्धमानस्य साइबर-अपराधस्य (Cyber Crimes) नियन्त्रणाय उभयपक्षीय-संयुक्त-प्रयासानां विषये विस्तरेण चर्चा कृता।

## अबू-धाबी-इत्यत्र भारतीय दूतावासेन भारतीय नागरिकेभ्यः पश्चिमेशियायां प्रचल्यमाणं संघर्षम् अभिलक्ष्य सतर्कतायै सुरक्षानिर्देशाणां पलनाय च परामर्शः प्रदत्तः



**हिमसंस्कृतवार्ताः -** अबुधाबी-नगरे भारतीय दूतावासेन यु. ए. ई. इत्यत्र स्थिताः सर्वे भारतीयाः नागरिकाः जागरूकाः, शान्ताः भवेयुः, यु. ए. ई. अधिकारिणां सुरक्षा-निर्देशान् पालयेयुः, पश्चिम-एशियायाः द्वन्द्वस्य परिप्रेक्ष्ये आधिकारिक उपदेशान् पालनाय च आदेशः प्रदत्तः अस्ति। परामर्शे उक्तं यत् असाधारण-परिस्थितिं दृष्ट्वा वायुक्षेत्रं, नियमित-निर्धारित-विमानप्रचालनं च अस्थायीरूपेण स्थगितम् अस्ति। दूतावासेन उक्तं यत्संकटे स्थिताः भारतीयाः नागरिकाः स्वस्वविमानसेवाभिः सम्पर्कं कृत्वा एतानि विमानयानानि प्राप्तुं शक्नुवन्ति । कस्यापि प्रश्नस्य चिन्तायाः च कृते यु. ए. ई. इत्यत्र स्थिताः भारतीयाः नागरिकाः अविराम् सहायता सेवया सह सम्पर्कं कर्तुं शक्नुवन्ति। वॉट्सऐप संख्या अस्ति अष्ट, शून्यं, शून्यं, चत्वारि, पट्ट, त्रीणि, चत्वारि, द्वे टोल फ्री सङ्ख्या नव, सप्त, एकं, पञ्च, चत्वारि, त्रीणि, शून्यं, नव, शून्यं, पञ्च, सप्त, एकं इति वर्त्तते ।

## युव-चिकित्सक-सम्मानः-: स्वास्थ्यक्षेत्रे नूतन-ऊर्जायाः सञ्चारः



नूतनदेहली-: विज्ञान-प्रौद्योगिकी-मन्त्री डॉ. जितेन्द्रसिंहः नूतनदेहल्यां २६ युव-चिकित्सा-व्यवसायिनः पुरस्कारैः सम्मानितवान्।अस्मिन् अवसरे सम्बोधयन् डॉ. जितेन्द्रसिंहः अवदत् यत् देशे स्वास्थ्यसेवाः सुदृढाः कर्तुं युव-चिकित्सकान् तेषां वृत्तिजीवनस्य (Career) प्रारम्भिकचरणे एव सम्मानितं करणं अतीव महत्त्वपूर्णं वर्तते। तेन प्रतिपादितं यत् प्रारम्भिकवर्षेषु चिकित्साक्षेत्रस्य जनानां प्रोत्साहनं तेभ्यः उत्कृष्टतां प्राप्तुं तथा च तीव्रगत्या विकसन्त्यां चिकित्साव्यवस्थायां स्वज्ञानस्य निरन्तरं वृद्धये प्रेरणां दास्यति।

चिकित्सापद्धतेः परिवर्तमानं स्वरूपं अधिकृत्य सः उक्तवान् यत् नूतन-तन्त्रांशानां तथा च कृत्रिम-प्रज्ञायाः (Artificial Intelligence) आगमनेन स्वास्थ्यसेवाक्षेत्रे क्रान्तिकारि-परिवर्तनं जायमानं अस्ति।डॉ. जितेन्द्रसिंहः स्पष्टीकृतवान् यत् यद्यपि प्रौद्योगिक्याः कारणतः रोगनिदाने (Diagnosis) उपचारे च महती उन्नतिः अभवत्, तथापि चिकित्साक्षेत्रे भिषजः (चिकित्सकस्य) भूमिका अपरिहार्या एव अस्ति।

# विश्वयुद्धं पर्यावरणक्षतिः च : एकम् चिन्तनम्



आधुनिकयुगे युद्धं केवलं सीमाविवादं न अस्ति, अपितु सम्पूर्णं जीवमण्डलं प्रति महान्तं सङ्कटं जनयति। यदा गोलकक्षेपाः (Missiles), विस्फोटकाः, रसायनानि च उपयुज्यन्ते, तदा तस्य मूल्यं केवलं सैनिकाः न, अपितु एषा धरित्री अपि निर्वहति।

**१. वायुप्रदूषणं जलवायुपरिवर्तनं च-:** युद्धकाले प्रयुक्ताः विस्फोटकाः अनन्तां विषाक्तवायुं (यथा- कार्बन-डाइ-ऑक्साइड्, सल्फर-डाइ-ऑक्साइड्) मुञ्चन्ति। अग्निना दग्धाः वृक्षाः भवनानि च वायुमण्डले 'ग्रीनहाउस'-वायूनां वृद्धिं कुर्वन्ति, येन 'ग्लोबल-वार्मिंग' (वैश्विक-तापवृद्धिः) तीव्रा भवति।

**२. मृदायाः जलस्य च विषाक्तीकरणम्-:**युद्धक्षेत्रे प्रयुक्तानि शस्त्राणि, तैलागारेषु प्रहाराः, रासायनिक-आयुधानि च भूमेः उर्वरतां नाशयन्ति। एतानि रसायनानि भूजलमपि दूषयन्ति, यस्य दुष्परिणामः आगामि-दशकेभ्यः प्रकृतौ तिष्ठति।

**३. जैवविविधतायाः विनाशः-:**युद्धं वन्यजीवानां आवासं छिनत्ति। युक्रेन-रशिया अथवा मध्यपूर्व-युद्धेषु सहस्रशः पशवः-पक्षिणः च मृताः। पारिस्थितिकी तन्त्रस्य (Ecosystem) एषः विनाशः अपूरणीयः अस्ति।

**४. नाभीय-विकिरणस्य भयम्-:**यदि युद्धे परमाणु-शस्त्राणां प्रयोगः भवति, तर्हि तस्य विकिरणम् (Radiation) न केवलं वर्तमान-पीढिम्, अपितु सहस्रवर्षेभ्यः पृथिवीं निर्जीवां कर्तुं शक्नोति।

**५.तैल-भण्डार-विनाशः जलप्रदूषणं च**

यदि युद्धे तैल-क्षेत्रेषु (Oil Fields) प्रहाराः भवन्ति, तर्हि तैलस्य प्रज्वालनेन कृष्णवर्णस्य विशालः धूमः आकाशं व्याप्नोति। अनेन सह समुद्रजले तैलस्य प्रसारेण समुद्री-जीवानां विनाशः निश्चितः अस्ति। मध्यपूर्वस्य समुद्री-पारिस्थितिकी (Marine Ecosystem) अनेन अतीव दूषिता भवति।

**निष्कर्षः-**अतः अद्यतनस्य आवश्यकता अस्ति यत् विश्वसमुदायः 'पर्यावरण-न्यायस्य' (Environmental Justice) विचारं कुर्यात्। युद्धस्य व्ययः केवलं वित्तेन न, अपितु प्रकृत्याः विनाशेनापि गणनीयः। शान्तिः एव एकमात्रः मार्गः अस्ति येन वयं स्वस्य उत्तराधिकारिभ्यः एकं सुरक्षितं हरितं च विश्वं दातुं शक्नुमः।

# हिमाचलप्रदेशात् अनुरागशर्मा राज्यसभायाः कृते कांग्रेस -पक्षस्य अभ्यर्थी भविष्यति, अद्य करिष्यति नामांकनम्



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशात् राज्यसभायाः एकस्य आसनस्य कृते कांग्रेस-पक्षेण काङ्गड़ा-जिलाकांग्रेसस्य अध्यक्षः अनुराग शर्मा इति नाम अभ्यर्थिरूपेण घोषितम्। कांग्रेस- उच्चनेतृत्वेन देशस्य विविधप्रदेशेभ्यः षट् अभ्यर्थिनः सूचीकृताः, यस्मिन् हिमाचलप्रदेशात् अनुरागशर्मा इत्यस्य नाम अपि सम्मिलितम् अस्ति।अनुरागशर्मा मुख्यमन्त्रिणः सुखविन्द्रसिंह सुक्खु इत्यस्य उपस्थितौ विधानसभायां स्वस्य नामांकनपत्रं समर्पयिष्यति। अस्य महत्त्वपूर्णस्य अवसरस्य पूर्वं मुख्यमन्त्री विधानसभापरिसरे कांग्रेस-विधायकदलस्य सभाम् आह्वयिष्यति। अस्यां सभायां आगामी राज्यसभा-निर्वाचनं तथा प्रदेशस्य राजनैतिक-स्थितिः इत्यादिषु विषयेषु चर्चा भवितुम् अपेक्ष्यते।

## अनुरागशर्मणः राजनैतिक-यात्रा

काङ्गड़ा- जिलाकांग्रेसस्य वर्तमान-अध्यक्षः अनुरागशर्मा दलस्य सक्रियः सदस्यः अस्ति, सः च संगठनस्य विविधेषु पदेषु कार्यं कृतवान्। तस्य अभ्यर्थित्वस्य घोषणया काङ्गड़ाप्रदेशे दलकार्यकर्तॄणाम् उत्साहः वर्धितः। अनुरागः शर्मा मुख्यमन्त्रिणः सुखविन्द्रसिंहसुक्खू इत्यस्य समीपवर्ती मान्यते। सः अद्यापि बीड़-बिलिंग पैरा-ग्लाइडिंग- संघस्य अध्यक्षः अस्ति, यः अन्तरराष्ट्रीयस्तरे पैरा-ग्लाइडिंग-प्रतियोगितानाम् आयोजनं करोति। अनुरागः पूर्वं सुधीरशर्मणः समीपवर्ती आसीत्, किन्तु अद्य सुधीरः भारतीयजनतापक्षात् विधायकः अस्ति। वर्तमानः राज्यसभासांसदः इन्दु गोस्वामी इत्यस्य कार्यकालः अप्रैलमासस्य ९ तिथौ समाप्तः भविष्यति। तस्मात् पूर्वमेव नूतन-सांसदस्य निर्वाचनं भविष्यति। अद्य नामांकनपत्राणि समर्पितानि भविष्यन्ति। श्वः तेषां परीक्षणं भविष्यति।

## राज्यसभा-निर्वाचनस्य महत्त्वम्

राज्यसभा भारतीय-संसदः उपरिसदनम् अस्ति, यत् राज्यस्य प्रतिनिधित्वं करोति। हिमाचलप्रदेशात् अस्य आसनस्य कृते कांग्रेस- अभ्यर्थिनः चयनं प्रदेशस्य राजनैतिक- गतिशीलतायाः दृष्ट्या अत्यन्तं महत्त्वपूर्णम् अस्ति। कांग्रेस-उच्चनेतृत्वस्य एषः निर्णयः राज्ये दलस्य संगठनात्मक-शक्तिं तथा नेतृत्वं प्रकाशयति।

# 'भाजपा यदि प्रत्याशिनं प्रस्थापयेत्, तर्हि अपि पराजिता अभविष्यत्', राज्यसभा-निर्वाचने सुक्खुः अवदत् येषां नैतिकता नासीत्, ते पूर्वमेव विक्रिताः



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खु अवदत् यत् अनुराग शर्मा ३० वर्षेभ्यः काङ्ग्रेसपक्षस्य विचारधारया सह सम्बद्धः अस्ति। सः छात्रसङ्घटनात् 'एनएसयूआई' (NSUI) इत्यस्मात् स्वकीयं राजनैतिकं जीवनं प्रारब्धवान् आसीत्। पक्षस्य शीर्षनेतृत्वेन सः राज्यसभायाः प्रत्याशी कृतः। एतदर्थं सः राष्ट्रियाध्यक्षस्य मल्लिकार्जुन खड़गे महोदयस्य राहुलगान्धी महोदयस्य च आभारं प्रकटयति।प्रसारमाध्यमैः सह सम्भाषणकाले मुख्यमन्त्री अवदत् यत् परिस्थिति-अनुसारेण राजनैतिक-समीकरणानि निर्मीयन्ते। सः उक्तवान् यत् भाजपा यदि प्रत्याशिनं प्रस्थापयेत्, तर्हि अपि तस्य पराजयः निश्चितः आसीत्। काङ्ग्रेस-पक्षे ४० विधायकाः सन्ति, सर्वे च पक्षस्य विचारधारया सह बद्धाः सन्ति। "येषां नैतिकता नासीत्, ते गतवारे एव विक्रिताः। अस्मिन् वारे कस्यापि प्रकारकः भयः नासीत्।"

## प्रत्याशिनः विषये सर्वेषाम् एकमतम् आसीत्

मुख्यमन्त्रिणा उक्तं यत् काङ्ग्रेसपक्षेण 'सङ्घटन-सृजन- अभियानम्' आरब्धम् अस्ति। अस्य अभियानस्य अन्तर्गतमेव सः (अनुराग शर्मा) अचिरेणैव काङ्गड़ा- जनपद- काङ्ग्रेस-समित्याः अध्यक्षः नियुक्तः। प्रत्याशिनं स्वीकृत्य तेन प्रदेशाध्यक्षेण विनयकुमारेण, उपमुख्यमन्त्रिणा मुकेशअग्निहोत्री महोदयेन, सर्वैः मन्त्रिभिश्च विधायकैः च सह चर्चा कृता। सर्वेषां मतम् आसीत् यत् हिमाचल-सम्बद्धः एव कश्चित् प्रत्याशी भवेत्। शीर्षनेतृत्वस्य समक्षं अस्य विषयस्य दृढतया पक्षमुपस्थापितम्।


## प्रत्याशिनं प्रति राहुलगान्धी महोदयस्य किं मतम् आसीत्?

राहुलगान्धी महोदयस्य मतम् आसीत् यत् तादृशः कार्यकर्ता प्रत्याशी करणीयः यः सङ्घटनाय समर्पितरूपेण कार्यं करोति, यस्य पार्श्वे च किमपि राजकीयपदं नास्ति। अनेनैव अनुरागशर्मणः नाम अग्रे आगतम्। 'बाह्य-प्रत्याशिनः' आगमनेन बहुधा चिन्तनं दृष्टिकोणं च परिवर्तते।

## कार्यकर्तॄणां चिन्तने परिवर्तनम्

सामान्यः कार्यकर्ता राज्यसभां प्राप्स्यति, अस्य कल्पना अपि कोऽपि कर्तुं न शक्नोति। शीर्षनेतृत्वस्य अस्मात् निर्णयात् कार्यकर्तॄणां चिन्तने अपि परिवर्तनं आगच्छति यत् ते अपि भविष्ये विधायकाः राज्यसभा-सदस्याश्च भवितुं शक्नुवन्ति।

# राज्यसभा-प्रत्याशी न कृतः इति कारणेन आनन्दशर्मा महोदयस्य महत् वक्तव्यम्



**हिमसंस्कृतवार्ताः- शिमला।** पूर्वकेन्द्रीयमन्त्री आनन्दशर्मा राज्यसभायै काङ्ग्रेसपक्षस्य प्रबलः प्रत्याशी मन्यते स्म। सः गुरुवासरे शिमलानगरे एव आसीत्। परन्तु स्वकीयं नाम निश्चितं न जातम् इति दृष्ट्वा आनन्दशर्मा प्रतिक्रियाम् अददात् यत् "सत्यकथनम् अधुना राजनैतिक- अपराधः जातः। राजनीतौ स्वाभिमानस्य मूल्यं दातव्यं भवति।" आनन्दशर्मा उक्तवान् यत् सः इन्दिरागान्धी- राजीवगान्धी- डॉ.मनमोहनसिंह-सोनियागान्धी महोदयानां समयम् अपि दृष्टवान्। सः अवदत् यत् सः सत्यं वदन् एव स्थास्यति। आनन्दस्य एतत् वक्तव्यं 'जी- २३' (G-23) इति विवादेन सह योजयित्वा दृश्यते, यस्मिन् सः केन्द्रीयनेतृत्वे परिवर्तनाय चर्चां कृतवान् आसीत्। सम्भवतः 'सत्यवचनस्य मूल्यम्' इति तस्य वक्तव्यं तस्यामेव दिशि सङ्केतं करोति। गुरुवासरे शिमलानगरे 'एएनआई' (ANI) इति संस्थया सह सम्भाषणकाले आनन्दशर्मा अवदत् यत् "मया किमपि न करणीयम्, न च मम पार्श्वे राज्यसभा- प्रत्याशिनः चयनविषये कापि सूचना अस्ति। अस्मिन् विषये काङ्ग्रेस-पक्षस्य शीर्षनेतृत्वम् एव किमपि वक्तुं शक्नोति, यैः निर्णयः कृतः येषां वचनेन च निर्णयः भवति, ते एव वक्तुं शक्नुवन्ति। अहं कामपि टिप्पणीं कर्तुं समर्थः नास्मि।" आनन्दशर्मा उक्तवान् यत् राजनीतौ तस्य ५० वर्षाणां कार्यकालो (Career) वर्तते। सः 'निराशा' इति तु न वदिष्यति, परन्तु एकं विषयं अवश्यं वदिष्यति यत् राजनीतौ स्वाभिमानम् अतीव महार्घं (Costly) भवति तस्य च मूल्यं दातव्यं भवति। सः दशकावधिं यावत् हिमाचलस्य देशस्य च प्रतिनिधित्वं कृतवान्। तेन काङ्गड़ा-मण्डी-आदिषु स्थानेषु बह्व्यः संस्थाः निर्मिताः, याः हिमाचलीजनैः सर्वदा स्मरिष्यन्ते। शिमला तस्य गृहं वर्तते, सः अत्र आगच्छन् एव स्थास्यति। सः शीर्षनेतृत्वं प्रति अस्मिन् विषये किमपि न वदिष्यति। उल्लेखनीयं वर्तते यत् आनन्दशर्मा विगते लोकसभा-निर्वाचने काङ्गड़ा-संसदीय-क्षेत्रात् काङ्ग्रेसप्रत्याशी आसीत्, यद्यपि तत्र सः पराजितः। सः राज्यसभायां विपक्षस्य उपनेता अपि आसीत्। शिमला-नगरेण सम्बद्धः आनन्दशर्मा मनमोहनसिंहस्य द्वयोः सर्वकारयोः केन्द्रीयमन्त्री आसीत्। हिमाचल- राजस्थानतः द्विवारं राज्यसभा-सदस्यः अभवत्। तस्य छविः राष्ट्रियस्तरस्य नेतुः अस्ति। आनन्दशर्मा १९८२ तमे वर्षे 'शिमला-नगरीय' विधानसभा- क्षेत्रात् निर्वाचनं कृतवान् आसीत्, यस्मिन् भाजपा-प्रत्याशिना सः पराजितः।

## सत्य-असत्यस्य कापि वार्ता नास्ति, वयं पक्षस्य आदेशं पालयामः- सुक्खुः

आनन्दशर्मा महोदयस्य 'सत्यकथनस्य दण्डः' तथा 'स्वाभिमानस्य मूल्यम्' इति वक्तव्ये पृष्टे सति मुख्यमन्त्री सुक्खूः अवदत् यत् "अहम् एतादेव वक्तुं शक्नोमि यत् पक्षस्य आदेशः एव पाल्यते। अत्र सत्य- असत्यस्य कापि वार्ता नास्ति।" सः उक्तवान् यत् एषा केवलं राजनैतिकी वार्ता अस्ति। यः प्रत्याशी अस्ति, सः पक्षस्य विचारधारायाः प्रतिनिधित्वं करिष्यति।

# प्रियङ्का- रॉबर्ट-वाड्रा च शिमलानगरं सम्प्राप्तौ; छराबड़ा- क्षेत्रस्य प्रकृतेः आनन्दं गृह्णन्तौ स्तः

हिमसंस्कृतवार्ताः- शिमला। राष्ट्रिय-काङ्ग्रेस-महासचिवः प्रियङ्का वाड्रा तस्याः पतिः रॉबर्ट वाड्रा च गतदिने शिमलानगरं सम्प्राप्तौ। सूचनानुसारं प्रियङ्का वाड्रा गतदिने मध्याह्ने वाहनदलेन सह भूमार्गेण प्रायः सार्ध-द्वादशवादने (१२:३०) शिमलासमीपस्थे छराबड़ास्थे स्वकीयम् आवासं प्राप्तवती। तदनन्तरं तस्याः पतिः रॉबर्ट वाड्रा अपि मध्याह्नोत्तरं प्रायः सार्ध- त्रिवादने (३:३०) छराबड़ास्थितं 'प्रियङ्का भवनं' प्राप्तवान्। अद्य द्वितीये दिने प्रियङ्का-वाड्रा तु कुत्रापि न गता, परन्तु रॉबर्ट वाड्रा प्रातःकाले छराबड़ास्थितं 'वाइल्ड-फ्लावर-हॉल' (Wildflower Hall) इति निजी-होटलं प्रति गतवान्, ततः च घण्टाद्वयानन्तरं प्रत्यागतवान्। तौ अहोरात्रं तत्रत्यस्य मनोरम-वातावरणस्य आनन्दं गृहीतवन्तौ। अपरपक्षे, राज्यसभायाः एकस्य आसनस्य कृते भविष्यमाणं निर्वाचनं प्रति अपि तयोः एषः प्रवासः राजनैतिकदृष्ट्या द्रष्टुं शक्यते।

# हिमाचले पञ्चायत-निर्वाचनस्य मार्गः प्रशस्तः, आपदा-प्रबन्धन- अधिनियमस्य अन्तर्गतं निर्गताः आदेशाः प्रत्याहृताः




**हिमसंस्कृतवार्ताः शिमला।** हिमाचलप्रदेशे पञ्चायतीराज-संस्थानां निर्वाचनस्य मार्गः अधुना पूर्णतया प्रशस्तः अभवत्। प्रदेशसर्वकारेण आपदा-प्रबन्धन- अधिनियमस्य अन्तर्गतं पूर्वं निर्गताः आदेशाः प्रत्याहृताः। राजस्व- विभागस्य आपदा-प्रबन्धनकोशेन निर्गतस्य आदेशस्य अनुसारं राज्ये सञ्चार- सम्पर्कस्य स्थितिः अधुना प्रायः सामान्याऽभवत्, अतः पूर्वं निर्गतः आदेशः प्रायः षट्-मासानन्तरं पुनः प्रत्याहृतः।

ज्ञातव्यं यत् हिमाचले पञ्चायतीराज-संस्थानां निर्वाचनार्थं सज्जताः तीव्रतया प्रचलन्ति। प्रदेश-सरकारेण सर्वेषां उपायुक्तानां प्रति रोस्टर-प्रक्रियासम्बद्धाः विस्तृताः निर्देशाः प्रदत्ताः। २० मार्चतिथेः आरभ्य जनपदेषु आरक्षण- सूची-निर्धारणस्य कार्यं प्रारभ्यते, ३० मार्च-पर्यन्तं तु तत् अन्तिमरूपेण निश्चितं भविष्यति।३१ मार्चतिथौ उपायुक्ताः स्व- स्व- जिलानां पञ्चायतीराज- संस्थानां रोस्टरं प्रकाशितं करिष्यन्ति। सर्वकारेण अपि स्पष्टं कृतं यत् नूतन- निर्मितासु पञ्चायतेषु, पुनःसीमाङ्कनात् प्रभावितासु पञ्चायतेषु आरक्षणस्य निर्धारणं निश्चित-नियमैः एव भविष्यति। अस्य कृते सम्बन्धित-जिलाभ्यः जनसंख्या- सङ्ख्याः, अनुसूचित- जाति, अनुसूचित- जनजातिः, महिला-वर्गस्य अनुपातः आधाररूपेण ग्राह्यः भविष्यति।उपायुक्तान् प्रति निर्देशाः दत्ताः यत् सम्पूर्णा प्रक्रिया पारदर्शितया, समयबद्धरीत्या सम्पन्ना भवेत्। प्रदेशे ८४ नूतन-पञ्चायतीनां गठनस्य अधिसूचना पूर्वमेव निर्गता अस्ति। एतासां नूतन-पञ्चायतीनां निर्माणेन अनेकासां विद्यमान-पञ्चायतीनां सीमासु परिवर्तनं जातम्, अतः आरक्षण- सूची-निर्धारणस्य कार्यम् अधिकं महत्त्वपूर्णं जातम्।उल्लेखनीयम् अस्ति यत् सर्वोच्च-न्यायालयेन हिमाचलप्रदेशे ३१ मईतिथेः पूर्वं पञ्चायतीराज-संस्थानां निर्वाचनं सम्पन्नं कर्तुम् आदेशः दत्तः। न्यायालयस्य आदेशानन्तरं राज्य-सर्वकारः तथा राज्य- निर्वाचन- आयोगः निर्वाचन-सज्जताषु तीव्रतां दत्तवन्तौ। आरक्षणसूची अन्तिम-निर्धारणानन्तरं निर्वाचन-कार्यक्रमस्य घोषणायाः मार्गः अपि प्रशस्तः भविष्यति। अनुमान्यते यत् अप्रैलमासस्य मध्यभागे निर्वाचन-प्रक्रियायाः औपचारिका अधिसूचना निर्गमिष्यति। अतः प्रशासनिकस्तरे सर्वाः आवश्यक-सिद्धताः तीव्रतया प्रचलन्ति।

# मुख्यमन्त्रिणा सुक्खुना ७ मार्च दिनाङ्के मन्त्रिमण्डल- गोष्ठी आहूता


सांकेतिकं चित्रम्

**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः ७ मार्च दिनाङ्के मन्त्रिमण्डलस्य गोष्ठीम् आहूतवान्। अस्यां गोष्ठ्यां विरामार्धं परं १८ मार्च दिनाङ्कतः आरभ्यमाणस्य विधानसभायाः आयव्ययक-सत्रस्य (Budget Session) कृते प्रस्तूयमानानां संशोधनानां स्वीकृतेः सम्भावना वर्तते। आयव्ययक-सत्रस्य अन्तरे १९ मार्च दिनाङ्के वित्तवर्षस्य २०२५-२६ कृते अनुपूरक-आयव्ययकं प्रस्तुतं भविष्यति, यस्मै मन्त्रिमण्डलेन स्वीकृतिः प्रदास्यते। एवमेव विधानसभायां बहवः संशोधन-विधेयकाः आनेष्यन्ते, ये गोष्ठ्यां अनुमोदिताः भवितुं शक्नुवन्ति। विविध-विभागेषु रिक्तानां पदानां पूरणाय सृजनाय च मन्त्रिमण्डलेन अनुमतिः प्रदास्यते इति सम्भाव्यते। उल्लेखनीयं वर्तते यत् हिमाचलप्रदेश-विधानसभायाः आयव्ययक-सत्रस्य अन्तरे मुख्यमन्त्री २१ मार्च दिनाङ्के वित्तवर्षस्य २०२६-२७ कृते मुख्य-आयव्ययकं (Budget) प्रस्तोष्यति।

## आयव्ययक-सज्जतासु निमग्नः मुख्यमन्त्री

मुख्यमन्त्री सुखविन्दरसिंहसुक्खू २१ मार्च दिनाङ्के प्रस्तूयमाणं २०२६-२७ वित्तवर्षस्य आयव्ययकम् अन्तिमरूपं दातुं वित्तविभागस्य दलेन सह कार्यं करोति। अस्य अतिरिक्तं विभागीयस्तरे अपि गोष्ठ्यः प्रचलन्ति। प्रतिकूलासु वित्तीय-परिस्थितिषु मुख्यमन्त्रिणः आयव्ययके यथा हिमाचलप्रदेशं 'आत्मनिर्भरम्' निर्मातुं सङ्कल्पः दृश्येत, कासाञ्चन नूतन- योजनानां शुभारम्भः अपि भवितुं शक्नोति। यद्यपि राजस्वहानि-अनुदानस्य (RDG) समाप्त्या सर्वकारस्य पुरतः आयव्ययक-सज्जतासु काश्चन समस्याः उद्भवन्ति।

## नेरचौक-आयुर्विज्ञान-महाविद्यालये 'रोबोटिक-शल्यलक्रिया- संकायस्य शुभारम्भं करिष्यति मुख्यमन्त्री

मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः शुक्रवासरे मण्डी-जनपदस्य लाल बहादुर शास्त्री आयुर्विज्ञान-महाविद्यालये (नेरचौक) 'रोबोटिक- सर्जरी-फैकल्टी' इत्यस्य शुभारम्भं करिष्यति। सः तत्रत्यैः सदस्यैः सह सम्भाषणं अपि करिष्यति। तदनन्तरं तस्य दियारगी-क्षेत्रे गमनस्य कार्यक्रमः अस्ति, यत्र सः बहूनां योजनानां उद्घाटनं शिलान्यासं च कृत्वा जनसमूहं सम्बोधयिष्यति।

# संस्कृतं मधुरं सदा- ०३




✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

अस्मिन् लेखे 'हिन्दूसंस्कृत्यां मानव-जीवनस्य सौन्दर्यम्' इति विषये यथाज्ञानं शब्दद्वयं प्रस्तोतुं प्रयत्यते। हिन्दुधर्मस्य आध्यात्मिकसंस्कृतिः हि भगवत्प्रेमसम्बद्धा संस्कृतिः वर्तते। संस्कृतिरियं मनुष्यजीवनस्य मुख्यं सौन्दर्यं वर्तते। यथा दीपशिखा स्वांशिनः सूर्यस्य अभिमुखा, उर्ध्वगामिनी च भवति, एवमेव नदीनां गतिः स्वांशिनः समुद्रस्य अभिमुखा भवति, तद्वत् मानवजीवनस्य गतिरपि स्वाभाविकतया भगवद्दिशि वर्तते, यच्च मानवजीवनस्य सौन्दर्यम् आख्यायते। निष्ठापूर्वकं स्थितानां हिन्दू- संस्कृत्यवलम्बिनां प्रत्येकं मनुष्याणां सदा कल्याणं हि भवति, नात्र संशयः। भगवद्गीतारामायणादिषु सद्ग्रन्थेषु वर्णितः भावः हि मानवजीवनस्य सौन्दर्यभावः वर्तते। प्रेमातिशयेन सर्वत्र भगवद्दर्शनं हि मानवजीवनस्य वास्तविकं सौन्दर्यमस्ति, अत्रैव मानवस्य कल्याणमपि स्यात्। सर्वानुद्दिश्य विहिता शुभभावना हि भगवत्प्रेमरूपा भावना कथ्यते। भगवत्सत्तारहित न कोऽपि प्राणी स्याज्जगति। आत्मनि, सर्वेषु प्राणिषु, सर्वत्र च भगवान् विराजते। भगवद्भावनया जीवतः मानवस्य जीवनं हि सुन्दरं सार्थकञ्च उच्यते।

आध्यात्मिकज्ञानस्य प्रभावतः मनुष्यः भगवत्प्रेमी, चरित्रवान्, सुसंस्कृतः च भवति। समस्तं जगद्धि भगवत्स्वरूपं वर्तते। तस्मात् जीवमात्रस्य सेवा भगवत्सेवातुल्या अस्ति। सर्वत्र भगवान् हि विराजते। तस्मात् अन्यत्र भगवतः अन्वेषणं करणीयं नास्ति, सः सदैव स्वपार्श्वे हि विद्यमानः वर्तते। तमेव मनसा नमस्कृत्य, सततं संस्मृत्य च स्वस्य सत्कार्यस्य नित्याचरणं कर्तव्यम्। एतदेव मनुष्यजीवनस्य सौन्दर्यमिति, शुभम्।

# हास्यकणिका-निर्धनः यमराजश्च

## (The Poor Man and Yamraj)



**निर्धनः-:** हे यमराज! मां हिमाचलस्वर्गे नयतु।

**यमराजः-:** किमर्थम्? (क्यों?)

**निर्धनः-:** यतः पृथिव्यां 'टैक्स' (Tax) दातुं मम शक्तिः नास्ति।

**यमराजः-:** वत्स! मा आगच्छ, स्वर्गे अपि इदानीं 'एण्ट्री टैक्स' (Entry Tax) अस्ति!



# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये। अण्डमान-द्वीपे मार्गाः अवकरैः व्याप्ताः इति दृश्यं जालपुटे दृष्टम्। जनैः महद्-दुःखं प्रकटितम्।

**काव्या-** सत्यम्। मालिन्यं न करणीयम् इति नियमः सर्वैः विस्मृतः। अन्यदेका वार्ता। लदाख-क्षेत्रे हिमीभूत-सरोवरस्य समीपे सीमा-रक्षक-सैनिकैः होलिकोत्सवः आचरितः। तैः महति शैत्ये अपि वर्णैः क्रीडितम्।

**नन्दिनी-** अहो, सैनिकानां धैर्यम् अपूर्वम्! प्रणामः मया कृतः। चेन्नै-विमानस्थानके एका भावपूर्णा घटना जाता। अष्ट-वर्षाणि यावत् सेवां कृत्वा त्रयः रक्षक-शुनकाः निवृत्ताः। ते अधिकारिभिः सम्मानिताः।

**काव्या-** उत्तमम्। तैः शुनकैः देशस्य महान् उपकारः कृतः। पञ्चनद-राज्ये अजापालकेन उन्नत- परीक्षायां षष्ठं स्थानं प्राप्तम्। सः किमपि साहाय्यं विना एव एतत् साफल्यं साधितवान् अस्ति।

**नन्दिनी-** अद्भुतम्! परिश्रमेण एव सः विजयं प्राप्तवान् अस्ति।

हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः